का०म० प्रसन्नोसिगुरोयद्दिदेयोवरोमम महिमानंकाशिपुर्यावदस्ववरणार्थिनः २० सत्यमेवत्वयाप्रोक्तंआ
२ श्चर्यंसर्वथाहितत् अन्यत्रबहुकालेनस्वधर्मैःसत्कृतैरपि २१ विष्णुरुद्रौनदृश्येतेलोहष्टावानंदकान
ने अन्याश्चदेवताःसर्वाःदृश्यंतेधर्मवत्सलैः २२ अन्यत्रबहुकालेनप्रकाशस्तुप्रजायते काश्यांप
येच्छादयंतिस्वदृष्टिंयेनराधमाः २३ काश्यांस्थितेपिविश्वात्मादृश्यतेतैर्नहिक्कचित् इतिश्रुत्वाम
1 यासद्योवेदविद्योमहत्फला २४ काकाशीकेनरचिताकथमाश्चर्यकारिणी महाप्रभावामहत्तोम
हादेवहरिप्रिया २५ कथंजातामहानन्दरूपिणोरूपवर्जिता २६ गुरुरुवाच धन्योसिवत्सभद्रंतेय
स्यतेमतिरीदृशी ययावशीकृताःसर्वेदेवाविप्राःसहात्मना २७ सर्वधर्मफलंसम्यक्काश्यांप्रद्द का०म०
धतेमनः काशीब्रह्मेतिविख्यातायद्विवर्त्तोजगद्भ्रमः २८ अविवर्त्ततदेवाहुःकाशीतिब्रह्मवादिनः॥ २
२९ यथाविष्णोःशंकरस्यापिनाम्नालोकाःशोकंनाश्यमोक्षंप्रयांति वाराणस्यानामगृण्हन्विशेषात्तौ

त्रायय्यामनुः पैलपुत्रोभाष्यकर्तावेदार्थाचारचंचुरः १० सर्वज्ञःसर्वदर्शीचसर्वज्ञपरिपूजितः ॥
ब्रह्मविद्देहगेहादिममतारहितःस्वदृक् ११ त्वत्पादाब्जरजोभिर्मांपूतंविषयवासनाः नस्पृशन्ति
दुराधर्षाःसर्पंतुमिहिकायथा १२ यत्रत्वंतत्रतीर्थानितत्रदेवामहर्षयः निवसंतिसदाब्रह्मन्
काशींकिंत्वमिहागतः १३ गुरुरुवाच० आदौत्वमेवचात्मानंपश्यवत्सविचार्यच बहुकालंबहिः
सेवाकृतातेममसुव्रत १४ देवानकश्चित्तेदृष्टःसेवयादीर्घयापिहि काश्यांस्वल्पेनकालेनदृ
ष्टोदेवउमापतिः १५ लक्ष्मीपतिरपिप्रोक्तःपश्यक्षेत्रमहोशुभाम् अन्यत्रयःकृतोधर्मःससांगःश्र
द्धयान्वितः १६ अनेककालसंपाद्यःससिद्धोत्रक्षणाद्भवेत् वर्षायुतसहस्राणियेसेवंतेहरिंहरम् ॥
१७ तेत्रक्षणात्प्राप्नुवंतिवत्सत्वमिवधार्मिकाः काश्यांकृतंस्वल्पमपिध्रुवंस्यात्पुण्येतरत्पुण्यमपि
स्वभावात् शिवःशिवाश्रीहरिरत्रहारिर्विधिर्विधिःस्वात्मजनेषुनूनम् १८ शिष्यउवाच० यदि

काम० शितैःस्यात् ३७ यत्रस्वेच्छाचारदोषात्सनष्टालोकाःकामाद्भ्रांतिभाजोभवन्ति तस्मात्सद्भिर्नैवपंथा
२ ह्यमुष्यःसेव्यःसेव्योवेदमूलोहिधर्मः ३८ दानंयज्ञानपूजनंकुर्वतांयसाम्नंकाशीलोलयातत्प्रदद्यात्
सस्मादेयदुर्लभंस्यात्मरूपंतिष्ठेकाशीसंप्रदद्यादपाये ३९ पापंकाश्यांवाङ्मनःकर्मभिर्नोकुर्यात्कु
र्याद्वाङ्मनःकर्मभिस्तत् यद्वैसाक्षाद्विष्णुनाशंभुनावाप्यामार्देस्मप्रोच्यतेसर्वकालम् ४० कालाद्भयं
2 नास्तियत्रयत्रपापभयंनहि जन्मांतरसहस्रेषुकृतंनश्यतिदर्शनात् ४१ तत्क्षेत्रमहिमानंकःसम्यग्व
र्णयितुंक्षमः तीर्थानियानिलोकेस्मिंजंतूनामघहान्यहो ४२ तानिसर्वाणिशुद्ध्यर्थंकाशीमायांतिनित्यशः
यस्तुकाश्यांवसेज्जंतुःसर्वव्यापारकृन्नरः ४३ तस्यापियागतिःप्रोक्तानसायज्ञैर्नचान्यतः स्मरंतियेनराः। राम०
काशींयत्रकुत्रापिसंस्थिताः ४४ तेप्यघौघविनिर्मुक्ताभवन्तिज्ञानभागिनः परंसाहसमालंब्यकाश्यां २
स्थेयंमुमुक्षुभिः ४५ साहसात्सिद्धिमाप्नोतिनरोविकलमानसः ४६ दीपकउवाच० किंतत्साहस

त्वांमृत्युंमृत्युंजेतास्वयंस्यात् २० तीर्थानिसंतिविविधानिफलप्रदानिकामप्रदानिधनधान्यसुखप्रदा
नि जीवन्विवेकसुखमाप्यसुखेननीर्त्वाकाश्यांभवार्णवमथोपरिपश्यतिस्तम् २१ यत्रद्विजाश्चाःश्व
पचास्तुनिंद्यायेचक्रवर्तिनृपधर्मरूपाः येवादरिद्राःपरमार्तिरूपाःसमानरूपांगतिमाप्नुवंति २२
मृत्वाशीत्वांकाशिकायांस्थितायेविप्रान्सर्वोन्नाश्यदेवीप्रसादात् तेदेहांतेनारकंप्राप्यमुद्धं शुद्धंलि
यंप्राप्नुवंत्येवसिद्धम् २३ वासःकाश्यांसज्जनानांप्रसंगोगंगास्नानंपापकर्मोरुविघ्नं पुण्यप्रीतिःस्व
च्छयालाभसौख्यंदानंशक्त्यानप्रतिग्राह्यमत्र २४ अष्टावेतेयस्यसंस्येवयोगायोगाभ्यासैस्तस्यकिंका
शिकायाम् यत्रस्थित्वाशंकरंवाहरिंवानोपासंतेविप्रपूगास्तुतेषाम् २५ काशीस्थलोकंसह[illegible]पिये
नप्रधर्षयंतेमनसामहांतः तेघोगतानन्त्वानपरानुजनौघान्हर्तुंमीशाःपरदेवभूत्याः २६ काश्यांस्थि
ताहींद्रियाणांव्ययंनोकुर्याद्दास्यात्तत्क्षतंरक्षणीयम् अंतर्यामीप्रेरकःकारणानांसोयंदेवाहींद्रियेनौ

का०म० ब्राह्मणंकाशिकायामन्नाद्यैर्योवासयेत्संमतर्प्यं त्रैलोक्यस्याद्रक्षितंतेनवक्ता ह्यासामभुःसंसतोरुद्रुतश्च

४ ५७ आनन्दाख्येकाननेयेवसंतिक्षेत्रन्यासंसंविधायानघुत्र तैर्वसत्वंरुद्ररूपैर्हियत्ताद्यतोरुद्रोधर्मपा

लःप्रसिद्धः ५८ येक्षेत्रसंन्यासकरमहामतेतेवन्दनीयाःकृतबुद्धयःसदा तेशंकरत्वंसमवाप्यजीवाभ

वंतिचेदिंद्रियार्थेषुलोलाः ५९ तेदांभिकावंचकाःस्वार्थकामाःकामारिमप्यात्मनावंचयंति लक्ष्मीप

3 तिःकिंचदभिक्षुकस्याद्गृहेगृहेदीनमनाःपरिभ्रमन् ६० संन्यस्तदेहःकिलकाशिकायांयःकश्चनेशः

सुकृतीमहेशः सचेद्भवेदैन्यपरोजनेषुततःपरःकोन्यतमःशिवध्रुक् ६१ शिवद्रोहात्काशिकाद्रोह

स्वभवस्यवश्यंनविचार्यमत्र यस्तुंप्रविक्रीयपुनर्नतस्यचिंतांप्रकुर्वंत्यपिपामराये ६२ संतःपुनःकिंन का०म०

रदेहंसमर्प्यजनंजनंदीनवत्प्रार्थयन्ते क्षेत्रसंन्यासशब्देननैश्चिंत्यंपरमंविदुः ६३ अन्यत्रयोगाभ्यासे ४

नयावज्जीवंकृतेनच वाराणस्यांप्राणरोधात्तत्पुण्यंसमवाप्यते ६४ स तीर्थावगाहाच्चयत्पुण्यंस्या

माख्यातं गुरुणा येन मानवः सिद्धिमाप्नोत्यविकलां महानंधविघातिनीम् ५७ गुरुरुवाच॰ समुद्रतर
णं चत्स्म महागरलभक्षणम् स्वशिरश्छेदनं कूपपतनं चाग्निभक्षणम् ५८ पर्वतात्पतनं सर्पैर्वृश्चिकैः
सह खेलनं अगम्यागमनं चैव तथा ब्रह्मवधादिकम् ५९ तथा पापांतरं चैव हननं च गजस्य च एते तु
साहसाभासाः ह्यतानश्यंत्यपि कचित् ६० अजितेंद्रियवर्गस्य कृतं कल्पशतैरपि न नश्यति महाबुद्धे सा
हसं किमतः परम् ६१ अजितेन्द्रियवर्गस्तु स्वात्मानं स्वयमेव हि ॥ अनेकगर्भजालेषु पातयत्यनिशं हठा
त् ६२ अतो महासाहसिनो जितेंद्रियान् ज्ञात्वा गुनश्यत्यपि शास्त्रजालम् जितेंद्रियाश्चापि हि साहसेषु
तास्वशक्यमप्याशु यतः प्रकुर्वते ६३ अन्नदानं तु यः कुर्याद्यस्य कस्यचिदप्यहो यावंत्यन्नानि तावंति यु
गानि स वसेद्दिवि ६४ वाराणस्यां निवसतां पुण्यमुपजायते तदेव संवासयितुः फलं भवति नान्यथा
६५ येयैरुद्दजितो जंतुस्तजेता धीसु दुःखितः तेते नरकजालेषु पच्यंते पितृभिः सह ६६ यं कश्चिद्दै

का॰म॰ सत्ययुगेकलावपिहिनान्यथा अधिष्ठात्रृषुवैषम्यंयुगादिषुभवेत्पुनः १० सत्येज्ञानंततोधर्मस्त्रेतायां
१५ द्वापरेमखाः कलौव्यवस्थाकाचिन्नदृश्यतेव्याकुलात्मनाम् ११ देहएवकलावात्मासुखंदेहस्यलाल
नम् १२ यथाकथंचिद्धिधनस्यसंग्रहः कलौनृणां पुरुषार्थःपरोयम् धनंकुलंधनमायुर्धनेनमान्या
लोकास्युःपापरूपाणिनीचाः १३ कलौद्विजाः शूद्रवदाचरंतो हसंतिवेदान्विषयेषुसक्ताः शूद्रारहसंप्र
विचारयंतिश्रुतेःश्रुतिंधर्मपरास्त्यजंति १४ कृत्वाबहूनिपापानिकाश्यामेवकलौयदि म्रियतेयातनां
तेहिसुद्दोमोक्षमवाप्नुयात् १५ कलावन्यत्रपापानिकरोतियदिपापकृत् तान्येवमानवंपापेप्रेरयंतिपु
नःपुनः १६ तैः प्रेरितोविशत्यंधंतमःशोकभयापहम् नपारंसंस्मरतेर्यातिकलौपापकृदुन्मदः १७ ॥ रा॰
गुरुरुवाच॰ एवंविधाःसुबहवोधर्माःस्मृतेनसंसदि मुनीनांकथितावत्सकलिदोषगुणैस्सह १८ तत्रै १५
वश्रुतवानस्मिद्वापरांतेबहूंस्ततः तच्छ्रुत्वाकाशिकांप्राप्तस्त्वयासहविकंपितः १९ दीपकउवाच॰ ॥

पुनः प्रोवाच तं शांतं वेदधर्मो महामुनिः भक्तिमंतं शिष्यवर्यं काशीवाससुखाप्तये ८३ ॥ इति श्रीब्रह्मवैवर्ते का
शीमाहात्म्ये तृतीयोऽध्यायः ३ ॥ गुरुरुवाच ॥ शृणु त्वं कलिदोषान् हि प्रसरंति यतस्ततः तान् ज्ञात्वा वर्ज
नात् पापान्मुच्यंते साधवः सदा १ पापिनां गुर्वभक्तानां श्रवणं विघ्नितं भवेत् तस्माद्दुःप्रपद्येत श्रवणे
च्छु सुपण्डितम् २ पण्डितोऽस्मि महाप्राज्ञ धर्ममूलविचारक त्वदग्रे कथयिष्यामि सूतोका मृषिसंसदि
३ कथां कलिप्रसंगेन काशीस्थितिविधायिनीम् ४ ऋषय ऊचुः कलिदोषगुणग्रस्तो नरो मुच्येत कथं
च न वद तत्सूत सर्वं त्वं गुर्वनुग्रहभाजन ५ सूत उवाच० शृण्वंतु ऋषयः सर्वे गुर्वनुग्रहमद्भुतम् विद्य
मानेषु मुनिषु पैलादिषु तपस्विषु ६ विलोमजं दीनतरं मां विलोक्य महातपाः कृष्णद्वैपायनो विष्णुर्मे
वक्तारं चकार ह ७ अष्टादशपुराणानि सेतिहासानि चानघाः उपदिश्याव दद्देवः श्रावयस्व महामते
८ भवंतस्तत्समासन्नाः साधवः समदर्शिनाः कृपयंति महात्मानः कथाश्रवणतत्पराः ९ कालः सम

का०म० प्राणिमात्रस्यपापाद्धीरोः शिवात्मनः जातेसाधनवैकल्येकाशीपूर्णंप्रकल्पयेत् ३० तीर्थांतरेषुवैकल्या
१६ द्विघ्नः संजायतेनृणां मुमुक्षवः सावधानाः पापसंसर्गवर्जकाः ३१ पश्यंतिशीघ्रंमनुजास्तद्विष्णोः परमं
पदम् अतएवविचित्रेयंकाशीशीघ्रफलप्रदा ३२ सेव्याधीरैर्मोक्षपरैर्नपापैः पापिसंगिभिः ३३ क
लौनकाशींविसृजेत्कथंचिन्मुमुक्षुरव्यग्रमनामनागपि धैर्यंविधायात्रयथाकथंचित्स्थैर्यंविचार्यास्तु
कलिप्रभावम् ३४ कालस्तुभगवान्विष्णुः समः सत्यादिनामसु युगेषुप्राणिनोवत्सविषमाविषयेग्रहाः
३५ प्राप्नुवंतिफलंतत्रयथायद्यदनुष्ठितम् कलिकालस्तथाकाशीपापाद्धीतंमनोयदि ३६ एतत्त्रयसमा
युक्तोनरोजीवन्विमुच्यते अत्रतेकथयिष्यामिकथांपापापनोदिनीम् ३७ यांश्रुत्वामुच्यतेजंतुः संदेहवि रा०म०
षयैरघैः अस्तिमाहिष्मतीनामनगरीनर्मदातटे ३८ तत्रकश्चिद्द्विजवरोविष्णुशर्मेतिकीर्तितः वेदयज्ञ १६
तपोदानस्वधर्मैः संयुतोवशी ३९ तस्यपुत्रौमहात्मानौवीतरागौमनस्विनौ अग्निशर्माभवज्ज्येष्ठः सोम

कृपाकरकलेदोषान्गुणान्वद्विदांवर स्तोतात्काशिसंबद्धान्धर्मांश्च कलिनाशकान् २० जितेन्द्रियाःपा
पविवर्जकाश्चशांतामहांतोमधुसूदनाश्रयाः अन्येषुतीर्थेष्वपिमुक्तिभाजोभवंतिकाश्यामधिकोविशेषः ॥
२१ श्रीगुरुरुवाच॰ कामक्रोधादयोदुष्टाःसूक्ष्मच्छिद्रनिरीक्षकाः प्रविशंतिचसर्वेषुक्रियासुमहतामपि
२२ बहवःशात्रवोदुष्टाबाह्यांतःकरणेषुच प्रविश्यघोरमप्यासुनघोरंकारयंतिहि २३ एकेनबहवोधू
र्तानिवार्यंतेकथंवद महानपिमहामोहंयातिधीरतरोपिहि २४ येवंचितःप्रपतेतिव्यग्रःसंस्कारतोव
शी विशेषंशृणुवस्यामिकाश्याःकथयतोमम २५ जितेंद्रियत्वंधीरत्वमंतःकरणनिग्रहः तपोजपःस्व
धर्मश्चदानंयोगादिकाःक्रियाः २६ निर्वाणसुखपूगस्यसाधनानिभवंत्युत तथापिवासनाजालंनवि
मुंचतिमानवम् २७ ज्ञानानिसाधनान्यत्रस्वल्पान्यपिमहामते भवंतिकाशिमाहात्म्यात्सिद्धान्येवनसंश
यः २८ अन्यत्रसाधुसुकृतैःकृतैर्मुच्येतवानवा भोगेच्छाग्रस्तहृदयःसापीच्छात्रनिवर्तते २९ मुमुक्षोः

का०म० त्वितः ५० समां गतिमवाप्नोति शरीरव्ययमात्रतः ब्रह्मानन्दस्य जननीं ब्रह्मादिपरिसेवितान् ५१ सुकृतैः
१७ सर्वतः पूर्णापापहेष्टाश्रयेन्नरः रागादिमलनिर्मुक्तधियां शीघ्रफलप्रदाम् ५२ तां काशीं को न सेवेत व
र्णाश्रमविभागवान् इत्यादिबहुसाहस्रगुणाः प्रोक्ता महर्षिणा ५३ अनुना महर्षिभिः श्रेष्ठैः विष्णुशर्मसु
तैरपि तेष्वग्निशर्मा च तथा सोमशर्मा विचारकः ५४ प्राप्तो फलं विलम्बेन शीघ्रेण च विचारतः ५५॥
दीपक उवाच० विचारनिष्ठौ द्वौ प्रोक्तौ फलभेदः कथं तयोः को वा विचारस्तु तयोः फलं वा किं समापतुः
५६ ब्रह्मोवाच० इति शिष्येण स गुरुः पृष्टः प्राह फलं तयोः शीघ्रं विलम्बेन तथा सोमाग्निशर्मणोः पृथक्
५७ वेदधर्मोवाच० भ्रातरौ परमस्निग्धौ कदाचिन्नर्मदातटे उपविष्टौ मोक्षपरौ ऊचतुस्तौ परस्परम् ५८ काम०
अग्निशर्मोवाच० सोमशर्मन्महाप्राज्ञ गमिष्यामि हरेः पुरीं वाराणसीं मोक्षकामो विश्वेशादिभिरर्चिताम् ५९ १७
त्वमप्यागच्छ शीघ्रेण यत्र मोक्षः प्रलभ्यते न्यूनातिरिक्तं तपसो धर्मस्यान्यस्य शंकरः ६० विगुणं सद्गुणं कु

श्रमीतथैवच ८० गतौतौप्रत्यहंतीरंसुभंश्रवणतत्परौ रेवायाःशिवविष्ण्वर्ककथापूर्वविराजितम् ८१
ब्रह्मवादःसमभवत्कदाचित्तन्नवंधनुत कथंबंधविनिर्मुक्तःकथंशांतिसुखंन्टणां ८२ कथंनिर्विघ्नता
भूयात्तपस्सन्तापहारिणः तत्रतीर्थोविशेषेतुस्वल्पंबहुफलंभवेत् ८३ यत्रनारायणःसाक्षाद्दृश्यतेचानु
भूयते यत्रदेवोमहादेवःसोमःसाक्षात्कृपानिधिः ८४ साक्षात्क्रियेतसर्वात्माविघ्नविघ्नोगणाधिपः॥
यत्रतुद्वादशादित्याब्राह्म्याद्यादेवतागणाः ८५ भजतांसर्वलोकानांसिद्धिंयच्छंतिमानिताः एवंप्रश्न
समवायंकथयंतुद्विजातयः ८६ सूतउवाच० एवंपरस्परंदृष्ट्वातूष्णींभूतान्द्विजर्षभान् शैवोमृकंडतन
यःस्मत्वावचनमब्रवीत् ८७ मार्कण्डेयउवाच० अहोमायाभगवतीविष्णोर्मोहकरीन्टणां अविमुक्ते
विद्यमानेब्रह्मविष्णुशिवाश्रये ८८ मृगयंत्यघनाशायभोगंमोक्षंविमोहिताः शृण्वंतुमुनयःसर्वेश्रु
तिस्मृतिनिरूपितम् ८९ रहस्यंकथयाम्यत्रब्रह्मात्मैकत्वलक्षणम् महापातकसंयुक्तोमहापुण्यसम

का॰म॰ स्यदेहंलज्जापरस्यच १२१ द्वापरोनोक्तवान्किंचित्तेनैवसहजग्मिवान् सुमतिःकाशिराजंतंमोचयित्वा
२७ द्विजैर्हतः १२२ उवाचकाशिराजन्त्वंगच्छकाशींनराधिप महासेनःस्वतःपापश्चाविष्टःकलिनापुनः १
२३ यत्रयत्रमहासेनःप्रयातिचिरदुःखितः तत्रतत्रमहातीर्थैःकाशीसद्भिःप्रवर्ण्यते १२४ एवंतीर्थान्यने
कानिकृत्वाराजासुदुर्मनाः द्वारकांप्राप्यसकलिस्त्यक्ताभीतःपलायितः १२५ निष्पापोद्वारकांगत्वाक
लिनासंविनाकृतः संस्मरन्काशिकांपुण्यांपरमानंदरूपिणीम् १२६ कथंयास्येपुनःकाशींब्रह्मादिसु
रसेवितां नयमांदेवदेवेशद्वारकानाथकेशव १२७ स्वर्धुनीतीरवसतींकाशींकामदुघांसतां प्रसह्यपूज
यित्वातुहरिंदेवकिनंदनम् १२८ प्रार्थयामासनिरतःकाशीविरहकातरः कां शींप्रस्थापयविभोद्वार रा॰म॰
कानाथकेशव १२९ अनादरःकाशिकायांसत्सुश्रीगुरुषुप्रभो शिवेशिवकथायांवाजातःपापविवर्द्धनः २७
१३० अहोसुकृतमेवाद्यमकार्तंमहर्निशम् यद्दिनाभ्युदयंप्राप्याहंजातश्चात्मघातकः १३१ द्वासंकृत्वा

ध्रियतांराजाप्रतिष्ठानपतिःकृशः ११ नपुनर्मांसमासाद्युद्धंकुर्याद्यथामम ममकाशीपतेस्त्वग्रेक
थंस्थास्यतिदुर्मतिः ११२ वदन्तिसंमहासेनोमहाबलपराक्रमः तथासुमेधसाराज्ञाध्वतःशिवपरा
ङ्मुखः ११३ एवंश्रुत्वंमहाराजामयातुच्छेनकिंजितः वामदेवेनसंवादंकृत्वापित्वंस्यचेतनः ११४
शिवभक्तस्यतेराजन्कथमेवंपराभवः पापात्रस्तस्यशांतस्यधार्मिकस्यमहात्मनः ११५ द्विजदेवपित
ग्नत्रपूजकस्यरणार्थिनः वामदेवादिऋषिभिर्बोधितस्यापिसन्मतेः ११६ प्रजापालनरक्तस्यमूरस्य
विजितात्मनः नहिस्तीर्थवासेनसत्संगेनश्रुतेनवा ११७ मतिःकलुषितानृणांभवतिब्रह्मसेविना
म् नहिपापात्मनांसंगोभवेत्पुण्यजुषांक्वचित् ११८ कथमेवंपराभूतिस्तुच्छात्स्वेच्छापरस्यभो तवजाता
महाराजविचार्यवदतत्त्वतः ११९ गुरुरुवाच॰ एवमुक्तःकाशिराजोधार्मिकेणसुमेधसा लज्जितो
वोकृशिरोजातःकिंचिन्नोवाचतंनृपम् १२० कतिरंतरमासाद्यनत्वासुमतिमीश्वरं प्रविष्टःकाशिराज

का॰म॰ वकश्चिद्दृढनिश्चयो भवेद्यः संवसेत्सर्वविषं विहाय विषं प्रपीतं सकृदन्नमारकं गर्भप्रदा विषयाः पापरू
३२ पाः ९८ ते किं ममानंदवने प्रयुक्ताः सुखं प्रयच्छंति सुदुर्भरा यतः अतः कामः पापकर्मा वराकः कथं सुखा
यालमदीर्घसत्वः ९९ क्रोधः पुनः क्रूरकर्मा कदर्पः सुखप्रदः कथमात्मन्यहंता लोभो दैन्यं न त्यजेत्
क्वापि लोके तृष्णा भार्या संगतः साधुनिंद्यः ९१ तस्मादेतैर्विघ्नरूपैर्नृशंसैः संसेव्यंते काशि सौख्यप्र
8 दानैः काश्यां परानंदमयं महत्सुखं क्षुद्रं कथं कामयेत्काशिवासी ९२ गंगां विहाय यास्तु चिगर्तपापो धि
क्कृधिक्कृतः साधुजनैर्महात्मा भवत्यवश्यं सुकृतैर्विहीनो मृतः स चेत्तु काशिकायां पिशाचः ९३ का
मादीनां सेवया शास्त्रभंगः सच्छास्त्राणां सेवयानंदसंघः तस्मान्मयोक्तं श्रवणं पुरस्तात्पुरस्कृतं साध राम॰
येन्मोक्षमार्गम् ९४ ये वसंति सततं मम मालये सुहृद्भावनिरतास्तपोमयाः ब्रह्मरूपममलं हि काशिका ३२
वाश्रयेत्सुखकरं न चान्यथा ९५ को द्विजन्मकृतपुण्यभारभृत् काशिकां समनुविश्य निर्मलः जाय

वसंतः वर्त्तंतयःकाशिकायांसदाजनोनतस्यदुःखंनचविघ्नपूगः ५० नशक्नुवंतितिष्ययुगेतु कर्तुंतपोव्र
तंयोगसमाधियत्नाः तस्मात्काश्यांसंवसेच्छास्त्रयुक्त्यायथानकामादिगणःपराभवेत् ५१ नारदउवाच
नारायणगुरोमह्यंकथयस्वमहामुने काशास्त्रयुक्तिर्भगवन्ययाकामादिसंक्षयः ५२ नारायणउवाच
शृणुनारदवक्ष्यामिशास्त्रयुक्तिंसुदुर्लभां यामाश्रित्यतरेद्दुर्गमेतद्विषयसंकटे ५३ रोगग्रस्तानिरोगा
वैदृश्यंतेविविधाजनाः संसाररोगसुग्रस्ताःसदेवासुरमानवाः ५४ नविनाकाशिकांकेचिद्रोगाःसंभ
वंतुन ५५ सहस्रकार्याणिविहायकाश्यांकाशीगुणाञ्छृणुयाद्ययावत् क्षेत्रस्वरूपंप्रतिबुद्ध्यते
यैःश्रद्धारतिःपापनिवृत्तिरुद्भवेत् ५६ काशीकथासंश्रवणेनसम्यग्मनःशुद्धिर्जायतेवैनराणाम्॥स्थि
तिप्रकारंपरमंवेत्तिसम्यक्स्थित्वायथावत्प्रविमुच्यतेभयात् ५७ काशीगुणांश्चकुरोवेत्तिसम्यक्।
कश्चित्किंचिद्दृष्टयोज्ञाननिष्ठाः ततोपिकिंचिद्विबुधादयोयेविदुर्गुणान्स्वल्पतरान्हिकेचित् ५८ तेष्वे

का॰म॰ समितिरुद्रावासमितिस्फुटम् ब्रह्मावासमितिप्राहुर्ब्रह्मविद्याविशारदाः ५२ शृणुतत्रस्यमाहात्म्यंकिं
३१ चिद्वक्ष्यामितेनघ यत्रस्थितानांजंतूनांसाधनानिपदेपदे ५३ भवंतिदृढबुद्धीनांनिष्पापानांनसंशयः ५४
अहोलोकाःशोकेपततिनहृथासाधनश्रमैः परिक्रांतांकाशीपरिहरतिदैवोपहतधीः विनाक्लेशैर्यस्यांवि
विधहृषसारंहृषपतिं लभंतेयत्रसाःपसुपतिशिवंशास्त्रुशरणाः ५५ काश्यांस्थित्वामातरेवात्रढुंढिंमां
9 विश्वेशंदंडपाणिंरविंवा सर्वान्नत्वाकाशिसंस्थांस्तुनित्यंततःकुर्यान्नित्यनैमित्तिकानि ५६ काश्यांस्व
दारेष्वपिनित्यवृत्तिःकाश्यांस्ववित्तेष्वपिसुप्रवृत्तिः काश्यांकुटुंबेष्वपियस्यबुद्धिर्देहेत्वहंप्रत्ययनन्न।
स्यबुद्धिः ५७ भोगेनमोक्षस्यसुखंकदाचिन्मोक्षेनभोगस्तुयतोननित्यः सुभोगमोक्षप्रदाकाशिकेयंनय रा॰म॰
स्यसौख्यायसुखंनतस्य ५८ जितेंद्रियत्वंसुतपोयत्रचोक्तंऋतौस्वभार्यागमनंब्रह्मचर्यं यथाकथंचिन्म ३१
मनामकीर्तनाद्धिमुच्यतेसर्वदुःखैर्मनुष्यः ५९ शिवंशिवांप्रत्यहमर्चयन्नरस्तथागणेशान्ध्रुवतत्सच्छि

मानाः कामक्रोधैः सुदारुणैः शोकमोहैः सुदुःपारैर्लोभासंतोषविग्रहैः ३१ अहंममाभिमानोत्थैर्नानाविष
यपन्नगैः भक्ष्यमाणा महांतोपि हृष्टाविषयलोलुपाः ३२ नशास्त्रं नगुरुर्देवो नसत्संगो नधीरता गुणाये
सुहृद्वर्णानामपि पंडितमानिनाम् ३३ सर्ववर्णाश्रमाणांये धर्मास्तेषां नपालनम् दृश्यते किंचिदपि चजी
वानां कथमुद्धृतिः ३४ कालावयवदोषेस्तु ग्रस्यमानाः कथं प्रजाः भोगमोक्षादिपात्रं सुविवादबहुला
10 ःसदा ३५ कथयस्व महाविष्णोर्गुरोर्गुरुतरां कथाम्॥ ३६॥ नारायण उवाच॰ शृणु नारद सर्वेषां मोक्षोपायं
सुदुर्लभम् वक्ष्यामि गोप्यमपि ते त्वं मे शिष्यो जगद्धितम् ३७ वाराणसीति विख्याता नगरी सुगरीयसी ॥
मयाहरेण हरिणा द्रुहिणेनानलेन च ३८ आदित्येन गणेशेन भवान्या मुनिभिः सुरैः यक्षैः किंपुरुषैर्नागैर्गं
धर्वैरपि चोरगैः ३९ सिद्धचारणगंगादितीर्थैर्यज्ञादिभिः सदा सेविते यं सदेशानैः परमानंदकांक्षिभिः ४०
मुक्तिदानामपि मुने महाप्रीतिकरी मता। आनंदवनमित्येव नामास्याः प्रथितं प्रियम् ४१ नारायणावा